अलाभे द्रव्याणि

ஸ்நபநங்களில் சொல்லப்பட்ட த்ரவ்யங்கள் கிடைக்காவிட்டால் சேர்க்கவேண்டிய த்ரவ்யங்கள்.

पाद्यद्रव्यांतरालाभे दूर्वार्घ्येपि च सर्षपः।
शस्तमाचमनीये तु तक्कोलं मार्जनांबसि।
सहदेवी गन्धतोये चन्दनक्षोद इष्यते।
कषायतोयेचाश्वत्थं शीतमुष्णोदके सति।
रत्नोदके वज्रमेकं कदळ्येका फलांबसि।
सुवर्णं लोहपानीये शालितण्डुलमक्षते.
यवोदकघटे व्रीहिः शस्यते कमलासन।
अलब्धे दधिनीक्षीरं क्षीरालाभे तु तद्दधि।
मधून्यलब्धे सर्पींषि तदलाभे भवेन् मधु।
अलाभे पञ्चगव्यानां घृतमेवैकमिष्यते।
पञ्चगव्येषु यस्यस्यात् अलाभस्तत्पदे घृतम्।
इति भगवदुक्तैः एवं द्रव्यपूरणं कृत्वा ।

பாத்யத்ரவ்யாந்தராலாபே தூர்வார்க்யேபி ச ஸர்ஷப:
சஸ்தமாசமநீயே து தக்கோலம் மார்ஜநாம்பஸி
ஸஹதேவீ கந்ததோயே சந்தநக்ஷோத இஷ்யதே
கஷாயதோயேசாச்வத்தம் சீதமுஷ்ணோதகே ஸதி
ரத்நோதகே வஜ்ரமேகம் கதள்யேகா பலாம்பஸி
ஸுவர்ண லோஹபாநீயே சாலிதண்டுலமக்ஷதே.
யவோதககடே வ்ரீஹி:சஸ்யதே கமலாஸந
அலப்தே ததிநீக்ஷீரம் க்ஷீராலாபே து தத்ததி
மதூந்யலப்தே ஸர்பீம்ஷீ ததலாபே பவேந் மது
அலாபே பஞ்சகவ்யாநாம் க்ருதமேவைகமிஷ்யதே
பஞ்சகவ்யேஷு யஸ்யஸ்யாத் அலாபஸ் தத்பதே க்ருதம்.
இதி பகவதுக்தை: ஏவம் த்ரவ்யபூரணம் க்ருத்வா.